National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2026; 1(67): 122-124
© 2026 NJHSR
www.sanskritarticle.com

**अमितकुमारशुक्लः**
शोधच्छात्रः,
साहित्यविभागः,
गंगानाथझापरिसरः,
प्रयागराजः

**Correspondence:**
**अमितकुमारशुक्लः**
शोधच्छात्रः,
साहित्यविभागः,
गंगानाथझापरिसरः,
प्रयागराजः

# साहित्यसारग्रन्थानुसारं रसविवेचनम्

**अमितकुमारशुक्लः**

संस्कृतसाहित्यशास्त्रे रससिद्धान्तः सर्वमूर्धन्यः प्राणभूतश्च मन्यते। भरतमुनेः रससूत्राद् आरभ्य अर्वाचीनकाल यावत् रसविवेचनस्य विशाला परम्परा वर्तते। अस्मिन्नेव क्रमे अष्टादश-एकोनविंशतिशताब्द्याः सन्धिकालस्य उद्भटविद्वान् **आचार्यश्रीमदच्युतरायमोडकः** (अच्युतशर्मा) स्वकीये **'साहित्यसारः'** इति प्रौढे ग्रन्थे रसस्य अतीववैज्ञानिकं मौलिकं च लक्षणं प्रस्तौति। साहित्यसारः केवलं प्राचीनमतानां सङ्ग्रहः नास्ति, अपितु अत्र नव्यन्यायशैल्या वेदान्तदृष्ट्या च रसस्य आन्तरिकस्वरूपं निरूपितम् अस्ति। ग्रन्थकारः रसस्य आस्वादरूपतां ब्रह्मानन्दसहोदरत्वं च अङ्गीकृत्य तस्य सुव्यवस्थितां परिभाषां दत्तवान्।

**लक्षणम् –** आचार्य अच्युतरायेण 'साहित्यसारः' ग्रन्थस्य 'दक्षिणावर्तकम्बुरत्ने' (चतुर्थे रत्ने) रसस्य लक्षणं मम्मट-जगन्नाथादीनां मतानां समन्वयं कृत्वा इत्थं प्रतिपादितम् अस्ति-

**विभावाद्यैः परिपक्वः सामाजिकहृदि स्थितः।**
**अलौकिकचमत्कारकारी स्थायिभावो रसः स्मृतः॥**

अर्थात् सामाजिकानां (श्रोतॄणां प्रेक्षकाणां वा) हृदये वासनारूपेण यः **स्थायिभावः** (यथा रत्यादिः) पूर्वमेव विद्यमानः भवति, स एव यदा काव्यश्रवणेन नाट्यदर्शनेन वा विभाव-अनुभाव-व्यभिचारीभावानां संयोगात् परिपक्वावस्थां प्राप्नोति, तदा अलौकिकचमत्कारजनकः सन् **'रसः'** इति नाम्ना व्यवह्रियते।[1] **'विभानुभावव्यभिचारिसंयोगाद्रसनिष्पतिः'** अर्थात् विभावानुभावव्यभिचारि-संयोगात् रसस्य निष्पत्तिः उत्पतिर्भवति। रसनिष्पत्तिसम्बन्धे अन्यैः सवैराचार्यैः भारताभिमतरस-सूत्रस्यैवानुकरणं कृतमस्ति। उक्तं च मम्मटेन -

**कारणान्यथ कार्यणि सहकारीणि यानि च ।**
**रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः ॥**
**विभावा अनिभावास्तत् कथ्यन्ते व्यभिचारिणः ।**
**व्यक्तः स तैर्विभावाद्यैः स्थायीभावो रसः स्मृतः ॥**[2]

लौकिक-व्यवहारे रत्यादिस्थायिभावस्य ये कारण-कार्य-सहकारिणः भवन्ति, त एव काव्य-नाटकयोः विभावानुभावव्यभिचारिभावाः कथ्यन्ते । तैरेव विभावादिभिः व्यक्तः भूत्वा स्थायीभावः रसः कथ्यते । एवमेव साहित्यदर्पणकारेण विश्वनाथेन रसस्य निष्पन्नता एवं प्रदर्शिताऽस्ति, यत् विभावानुभाव व्यभिचारिभावैः अभिव्यक्तः सन् रत्यादिस्थायिभावः सहृदयानाम् कृते रसत्वमाप्नोति । आचार्यभरतेन नाट्य शास्त्रे उच्यते - **न हि रसाद् ऋते कश्चिदर्थः प्रवर्तत** ।[3] अपि च कथं रसनिष्पत्तिरिति जिज्ञासायां तेनोच्यते - **'विभावानुव्यभिचारिसंयोगाद्रसनिष्पतिः'**। अत्र विभावाः कारणानि, अनुभावाः कार्याणि,

व्यभिचारिणश्च सहकारिणः। एषां संयोगाद् रसस्य निष्पत्तिः। अतोऽधुना विभावादीनां निरूपणं प्रस्तूयते ।

**रसलक्षणस्य विशेषाः घटकाश्च**

साहित्यसारे प्रतिपादितस्य रसलक्षणस्य विश्लेषणेन निम्नलिखित-तत्त्वानि मुख्यानि दृश्यन्ते—

**स्थायिभावस्य मूलाधारत्वम्-** रसस्य मूलप्रकृतिः स्थायिभावः एव अस्ति। अनुभूतेः अभावतः रसः न सम्भवति। अच्युतरायमते रत्यादयः नव स्थायिभावाः एव रसत्वं भजन्ते।

**अलौकिकचमत्कारकारित्वम्-** रसः न तु लौकिकः सुखविशेषः अस्ति, न च दुःखम्। एषः कश्चन 'अलौकिकः चमत्कारः' अस्ति, यः सामाजिकानां चित्तं विस्तारयति, आनन्दमयं च करोति।[4]

**वेदान्तप्रभावः -** वेदान्तपरम्परायाः पोषकत्वात् अच्युतरायः रसम् **'अखण्डं स्वप्रकाशानन्दमयम्'** मनुते। रसास्वादनकाले सामाजिकः साधारणीकरणवशात् स्वकीय-परकीयभेदभावं विस्मृत्य विशुद्धानन्दं प्राप्नोति।

**भावविवेचनम् -** भावस्याधारभूमावेव रसप्रासादोऽधितिष्ठति। अतः भावविवेचनं नितान्तं श्रेयस्करम्। एतदभिलक्ष्यैव नाटयशास्त्रस्य सप्तमाध्याये पितामहेन भरतेन भाव शब्दः परिभाषितः - **'भावो मनसो विकारः'** अर्थात् मनसः विकृतिरेव भावः। अपि च - भावा इति कस्मात् । किं भवन्तीति भावाः किं वा भावयन्तीति भावाः। उच्यते - '**वागङ्गसत्त्वोपेतान्काव्यार्थान्भावयन्तीति भावा इति**' अर्थात् वागर्थसत्वोपान् काव्यार्थान् भाक्तित्वात् अमी भावा इत्युच्यन्ते। लोके यथा अनेन गन्धेन रसेन वा सर्वमपि वस्तुजातं भावितम्। इत्यत्र भावितमित्यस्यार्थः परिव्याप्तं सिद्धयति। स्वाभिप्रायं स्पष्टं कुर्वता कथितमनेन यत् योऽर्थः विभावैः निष्पन्नो भूत्वा अनुभावैः एवं वाचिकांगिकसात्विकाभिनयैः प्रतीतियोग्यो भवत्यसौ भाव उच्यते।

**विभावः** - आचार्यभरतानुसारं विभावो विज्ञानार्थः । विभावोऽयं स्थायी-भावानां हेतुः। कायिक-वाचिक-सात्विकाभिनयानां विभावनं (ज्ञानं) येन भावत्यसौ विभावः। आचार्य विश्वनाथस्य मतानुसारेण लोके रत्यादेरुद्बोधकाः पदार्थाः काव्ये विभावा इति कथ्यन्ते। विभावा आलम्बनोद्दीपन भेदात् द्विविधा भवन्ति ।

**आलम्बनविभावाः** - नायक-नायिकादि पात्र विशेषा आलम्बन-विभावाः कथ्यन्ते । यतस्तेषामालम्बनेन रसः उत्पद्यते ।

**उद्दीपनविभावाः** - स्थायिभावस्योद्दीपक-विभावाः तत्रोद्दीपन-विभावाः कथ्यन्ते। नायक-नायकादिभिः सम्बन्धिताः देश-काल-चन्द्रोदय-पर्वत-नदी-वन-वसन्तर्त्वाय उद्दीपनविभावाः कथ्यन्ते ।

**अनुभावाः -** अनु पश्चात् भवन्तीति अनुभावाः उद्दीप्यनन्तरं मनसो भावनाः विभिन्न विकारेषु उद्भवन्ति। अनुभूयमानत्वादेते अनुभावाः कथ्यन्ते।[5] यथा कारणानन्तरं कार्यं भवति, तथैव विभावानन्तरमनुभावाः भवन्ति। अमीः स्तम्भ-रोमाञ्चादय अष्टसंख्यका सन्ति । यथा -

**स्तम्भः स्वेदोऽथ रोमाञ्चहू स्वरभङ्गोऽथ वेपथुः ।**
**वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्विकाः स्मृताः ॥**

आचार्य विश्वनाथः सत्वोद्रेकात्संभूतान्मनोविकारान् सात्विकभावाः मनुते ।

**व्यभिचारिभावाः -** 'वि' 'अभि' पूर्वकात् चर् धातोः विनि प्रत्यये कृते निष्पद्यते शब्दोऽयम् । यथा जले बुदबुदोतिष्ठते, निलीयते च तथैव ये भावाः क्षणे-क्षणे उत्पद्यन्ते निलीयन्ते च। ते व्यभिचारिभावाः कथ्यन्ते। सञ्चरनशीलत्वादमीः सञ्चारीभावा अपि कथ्यन्ते । अमीः भावाः त्रयश्चित्रंशत्संख्यकाः निगदिताः ।

**स्थायिभावाः -** मानवः दैनिकजीवने यत् पश्यति, यत्शृणोति, यदनुभवति, तस्य यः संस्कारः मनसि स्थिरः भवति । संस्कारोऽयं वासनेत्यप्यभिधीयते । अयं वासनारूपं संस्कार एव स्थायिभावः कथ्यते। आचार्यभरतेन नाट्यशास्त्रे अष्टौ स्थायिभावाः प्रोक्ताः सन्ति। मम्मटाचार्यस्य काव्यप्रकाशे नाट्यशास्त्रस्य कारिकामुदाहृत्य अष्टौ स्थायिभावाः स्वीकृताः सन्ति। साहित्यदर्पणकारस्य तत्र भवतः विश्वनाथस्य कथनमप्यभिनवगुप्तस्य मतमेवानुसरति। तन्मतानुसारेण भावनां परिपक्वावस्था रस इति कथ्यते। सहृदयपुरुषाणां हृदये स्थित-वासनारूपरत्यादिस्थायिभावाः एव विभावानुभाव-व्यभिचारिभावैः सम्मिलिताः रसरूपं भजन्ते।[6] रसास्वादस्तेनैव प्रतिपादितः ।

**रसाभास - भावाभासविवेचनम् -** साहित्यसारे रसलक्षणस्य सुव्यवस्थितये तस्य विकृतिकारकाणां (दोषाणाम्) अपि लक्षणं कृतम् अस्ति। अच्युतरायः रसस्य अनुचितप्रवृत्तिं **'रसाभासः'** तथा भावस्य अनुचितप्रवृत्तिं **'भावाभासः'** इति वदति । स रसाभासस्य मुख्यं कारणं **'अप्रसङ्गतावलम्बनम्'** तथा **'अयोग्यविषयता'** च मनुते। यदा लोकाचारहीनता अथवा अनुचितविभावैः (यथा बहुनायकविषय-करतिः) कामः प्रकट्यते, तदा रसः न भूत्वा रसाभासः भवति। अस्य तार्किकं विवेचनं पण्डितराजजगन्नाथस्य मतस्य सदृशं वर्तते।[8]

संस्कृत काव्यशास्त्रे रसशब्दस्यानेके अर्थाः सन्ति यथा - स्वादः, जलं, वीर्यं, शृंगारादयश्च काव्यरसाः, विषं, द्रवः, पारदः, रागः, तिक्तादयश्च भोज्यरसाः। उपनिषत्सु परमात्मनः कृतेऽपि रसपदस्य व्यवहारो अभूत्। यथा तैत्तिरीयोपनिषदि 'परमात्मा रसशब्देनाभिधीयते। यतः तत्प्राप्त्यनन्तरमेवानन्दानुभूतिर्जायते। वैदिकसाहित्ये शृङ्गारादि साहित्यिक रसानां कृतेऽपि रसशब्दस्य प्रयोगो वर्तते। आचार्यभरतेन वेदेभ्यः रसस्य ग्रहणं कृतमस्ति।[7] व्याकरणशास्त्रानुसारं रस शब्दस्य व्युत्पत्तिश्चतुर्धा यथा -

**'रस्यते आस्वद्यते इति रसः'** व्युत्पत्यानुसारेण आस्वाद्यमानाः सोमगन्धमध्वादयः पदार्थाः रसशबदेन कथयितुं शक्यन्ते ।

**'रस्यते अनेन इति रसः; एषां पदार्थानामास्वादनं क्रियते ते रसाः कथ्यन्ते ।** एवं राग-वीर्य-शरीरादिकञ्च रसः कथ्यते ।

**'रसति रसयति वा रसः'** यो व्याप्यते व्याप्नोति वा स रस इति कथ्यते।

**'रसनं रसः आस्वादः'** यः आस्वादः स रस उच्यते । एतदनुगुसारेण श्रृंगारादयो रसाः कथ्यन्ते ।

काव्यानां रसात्मकतां प्रतिपादयितुं वाल्मीकिरामायणस्य दृष्टान्त प्रस्तुयते यदा महर्षिः वाल्मीकिः स्नानार्थ तमसां नदीं जगाम्, तदा मार्गे तेनावलोकितं यत् केनचित् व्याधेन कामपीडित क्रौञ्च युग्लात् एकतर क्रौञ्चः वाणेन व्यापाद्य भूमौ पातितः। क्रौञ्चपत्न्या अत्यधिकः विलापः विहितः। तस्याः कारुणिकं विलापमाकर्ण्य वाल्मीकिः करुनार्द्रचेतोऽभूत्। महर्षेः वाल्मीकेः स शोक एव श्लोकरुपे परिणतो बभुव। आनन्दवर्धनाचार्येण तत्र पद्यमिदं काव्यात्मत्वेनोररीकृतम्। महाकविवाल्मीकिप्रणीतं रामायणमादिकाव्यमास्ते। यद्यपि काव्यमिदं करुणरससिक्तम् तथापि महाकव्येऽस्मिन् श्रृगार-हास्य-करुण-रौद्र-वीर-भयानक-अद्भुत-बीभत्सशान्तादीनां समेषां रसानां सन्निवेशो-ऽस्ति ।

**रसस्यभेदाः** - रससंख्याविषये नास्ति विदुषां मतैक्यम् । केचनाष्टौ रसाः, अन्ये नवरसाः, अपरे वत्सलोपेताः दशरसाः इतरे च एकादश रसा इत्यामनन्ति। पितामहेन भरतेनाष्टौ रसाः स्वीकृताः।[8] भरतानन्तरं आचार्यदण्डिनाऽपि अष्टावेव रसाः स्वीकृताः। आचार्योद्भट्टेन 'नवरसाः स्वीकृताः, तेन शान्ताभिधानस्य नवमरस-स्योल्लेखः कृतः । यथा -

**शृङ्गारहास्य करुणरौद्र वीर भयानकाः ।**
**बीभत्साद्भुतशान्तश्च नव नाट्ये रसाः स्मृताः॥**

आचार्य रुद्रटमहोदयोऽपि स्वरचिते 'श्रृगारतिलके' नवसाना-मुल्लेखश्चक्रे। नाट्यशास्त्रस्य प्रसिद्धव्याख्याताभिनवगुप्त महोदयो शान्त रसस्यापि विवेचनश्चकार। दशरूपककारेण धनञ्जयेन 'नाट्यार्थमष्टौ रसाः' इत्युक्त्वा शान्तरसस्य खण्डनचक्रे ।

वाग्देवताऽवतारेण मम्मटभट्टेन नाट्येऽष्टौ रसा इति उररीकृत्य शान्तोऽपि नवमो रसः स्वीकृतः । प्रायः शान्तरसस्य विषये विदुषां विमतिरस्ति। परं उद्भट्टादिभिराचार्यैः स्फुटरूपेण शान्त रसस्योल्लेखः कृतः। आचार्य विश्वनाथोऽपि वत्सलरसस्य निरूपणं चकार। एवमनेन काव्ये दशरसाः स्वीकृताः। केचन निष्णाताः भक्तिमपि पृथक् रसत्वेनोररीकुर्वते। अस्य स्थापना साहित्यक्षेत्रे नास्ति अपितु धार्मिकक्षेत्रेऽस्ति। साहित्ये अस्य गणना देवविषयक रतिरूपे भवति। किन्तु वैष्वाचार्येण भक्ति रसस्य मुक्तकण्ठेन प्रतिष्ठा कृतास्ते। ऐतेष्वाचार्येषु रूपगोस्वामीमधुसूदनश्च प्रमुखौ विद्येते ।

**निष्कर्ष: -** निष्कर्षरूपेण वक्तुं शक्यते यत् श्रीमदच्युतरायमोडकेन 'साहित्यसारे' प्रतिपादितं रसलक्षणं प्राचीनकाव्यशास्त्रीयपरम्परायाः प्रौढतमं स्वरूपं प्रस्तौति। अनेन रसस्य लक्षणे चमत्कारकारित्वस्य तथा सामाजिकनिष्ठतायाः यः समन्वयः कृतः, सः खलु वैज्ञानिकः वर्तते। एषः ग्रन्थः अर्वाचीनसंस्कृतकाव्यशास्त्रे रससिद्धान्तस्य गम्भीरतायाः व्यापकतायाः च परिचायकः अस्ति, यस्य प्रासङ्गिकता अद्यापि शोधजगति निरन्तरा वर्तते। रसविवेचने साहित्यसारग्रन्थे आचार्यभरतमुनेरनुकरणं साक्षाद्दरीदृश्यते। तत्र प्रायः रसस्य सम्पूर्णं विवेचनं प्रमुखकाव्यविदुषामाचार्य-भरतमम्मटविश्वनाथजगन्नाथा-दीनां मतानां विश्लेषणं ग्रन्थेऽस्मिन् साहित्यसारे विद्यत एव ।

**सन्दर्भ ग्रंथाः -**


[1] साहित्यसारः, चतुर्थं रत्नम् (दक्षिणावर्तकम्बुरत्नम्), रसलक्षण-प्रकरणम्, कारिका – 1,2

[2] काव्यप्रकाशः, - 4.27-28

[3] नाट्यशास्त्रम्, 6.32

[4] "चमत्कृतिः रसस्यात्मा, सा च अलौकिकी मता।
साहित्यसारः, दक्षिणावर्तकम्बुरत्नम्, कारिका - 5

[5] 'उद्बुद्धैः कारनैः स्वैः स्वैर्वहिर्भावं प्रकाशयन् ।
लोकैः यः कार्यरूपः सोऽनुभावः काव्यनाट्ययोः ॥'
साहित्यदर्पणम्, 3.131

[6] विभावानुभावेन व्यक्तः सञ्चारिणा तथा ।
रसतामेति रत्यादिस्थायिभावः सचेतसाम् ॥ साहित्यदर्पणम्, 3.2

[7] 'जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च ।
यजुर्वेदादभिनयान् रसानथर्वणादपि ॥' भरतनाट्यशास्त्रम्,१.१७

[8] शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
बीभत्साद्भुतसञ्ज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ॥
नाट्यशास्त्रम्,6.1